# Kartikamasakrite Shivashatashtanama Stotram Masa8

# कार्तिकमासकृते शिवशताष्टनामस्तोत्रम् मास ८

## Document Information

Text title : Kartikamasakrite Shivashatashtanama Stotram Masa 8

File name : kArtikamAsakRRiteshivashatAShTanAmastotrammAsa8.itx

Category : shiva, shivarahasya, aShTottarashatanAma, AratI, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 21 kArtikamAsArchanam | 39.2-55.1|| See corresponding nAmAvalI

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

Kartikamasakrite Shivashatashtanama Stotram Masa8

# कार्तिकमासकृते शिवशताष्टनामस्तोत्रम् मास ८

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवगौरीसंवादे -

विश्वाधिकाय वेद्याय वेदान्तनिरताय च ॥ ३९॥

परावराय वीर्याय शर्वायाथ कपर्दिने ।
उमाधवाय देवाय ताम्रायाथारुणाय च ॥ ४०॥

बभ्रवे नीलकण्ठाय घण्टाहस्ताय शम्भवे ।
रुद्रायामोघवीर्याय सर्वदाय पिनाकिने ॥ ४१॥

जातुकर्णाय सोमाय भवाय भवहेतवे ।
उग्राय घोररूपाय वामदेवाय मुण्डिने ॥ ४२॥

खगमाय शमायाथ सन्नगोर्ध्वविलासिने ।
आसन्नजनपालाय नीलग्रीवाय वेधसे ॥ ४३॥

अमोघबलवीर्याय शतावर्ताय रागिणे ।
हिरण्यवरवीर्याय रसेन्द्रवरवीजिने ॥ ४४॥

ध्वजिने गर्जमानाय हुङ्कारायोरुतेजसे ।
तिग्मायुधाय योधाय रथाधिपतये नमः ॥ ४५॥

बिल्मिने बिल्वपूज्याय प्रसन्नाय कपालिने ।
भिक्षवे यक्षपूज्याय त्र्यक्षाय प्रमथाय च ॥ ४६॥

उष्णीषिणे मकुटिने गदाहस्ताय वज्रिणे ।
खड्गखेटकरायाथ भिषग्वर्याय ते नमः ॥ ४७॥

भर्गाय सहमानाय युगावर्ताय भाविने ।
ज्वलज्ज्वालाय तुष्टाय हृष्टपूषाय धृष्णवे ॥ ४८॥

गुणप्रियाय गद्याय पर्णशाद्याय वैद्युते ।
वामदेवाय जाताय सद्योजाताय पाविने ॥ ४९॥

वर्षते ग्रसते चैव अवर्ष्यायावर्टाय च ।
काट्याय च प्रपथ्याय वास्तुपाय गरादिने ॥ ५०॥

बलप्रमथनायाथ सर्वभूतदमाय च ।
कालनाशाय देवाय भालनेत्राय दन्तिने ॥ ५१॥

हनाहनाय पुण्याय पुण्यावासाय ते नमः ।
पुरुषाय पुराणाय ऋषये वेदमूर्तये ॥ ५२॥

अन्नाधिपतये चैव सर्वेषां पतये नमः ।
वीतिहोत्राय पात्राय सुत्राम्णे भूधराय च ॥ ५३॥

परमेशाय भिद्याय अखिद्याय सुराय च ।
ब्रह्मकन्धरमालाय वामनागधराय च ॥ ५४॥

विष्णुरक्तप्रपानाय नरसिंह्महराय च ।

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तं कार्तिकमासकृते शिवशताष्टनामस्तोत्रं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः २१ कार्तिकमासार्चनम् । ३९.२-५५.१ ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 21 kArtikamAsArchanam . 39.2-55.1..

Notes:

Śiva शिव delivers to Devī देवी; Kārtikamāsakṛte ŚivaŚatāṣṭanāmaStotram कार्तिकमासकृते शिवशताष्टनामस्तोत्रम् comprising of 108 Names १०८ नामानि of Śiva शिव while detailing about His Worship during the Kārtika māsa कार्तिक मास.

The corresponding Kārtikamāsakṛte ŚivaŚatāṣṭaNāmāvaliḥ कार्तिकमासकृते शिवशताष्टनामावलिः derived from the Kārtikamāsakṛte ŚivaŚatāṣṭanāmaStotram कार्तिकमासकृते शिवशताष्टनामस्तोत्रम्, and a Kārtikamāsakṛte ŚivaStutiḥ कार्तिकमासकृते शिवस्तुतिः can be accessed from one of the links provided below.

More details about worshiping Śiva शिव during individual Māsa मास are given in Chapters 13-25.

Selected Śloka-s श्लोकाः from Chapter 21 are presented on this page.

Proofread by Ruma Dewan

---

*Kartikamasakrite Shivashatashtanama Stotram Masa8*
pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*